॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ३

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः ।
प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥ १॥

अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम ।
यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २॥

इति प्रत्यर्च्य तान्राजा ब्राह्मणानिदमब्रवीत् ।
वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम् ॥ ३॥

चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः ।
यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥ ४॥

कृतमित्येव चाब्रूताम् अभिगम्य जगत्पतिम् ।
यथोक्तवचनं प्रीतौ हर्षयुक्तौ द्विजर्षभौ ॥ ५॥

ततः सुमन्त्रं द्युतिमान्राजा वचनमब्रवीत् ।
रामः कृतात्मा भवता शीघ्रमानीइयताम् इति ॥ ६॥

स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ।
रामं तत्रानयां चक्रे रथेन रथिनां वरम् ॥ ७॥

अथ तत्र समासीनास्तदा दशरथं नृपम् ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः ॥ ८॥

म्लेच्छाश्चार्याश्च ये चान्ये वनशैलान्तवासिनः ।
उपासां चक्रिरे सर्वे तं देवा इव वासवम् ॥ ९॥

तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ।
प्रासादस्थो रथगतं ददर्शायान्तमात्मजम् ॥ १०॥

गन्धर्वराजप्रतिमं लोके विख्यातपौरुषम् ।
दीर्घबाहुं महासत्त्वं मत्तमातङ्गगामिनम् ॥ ११॥

चन्द्रकान्तानानं राममतीव प्रियदर्शनम् ।
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् ॥ १२॥

घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ।
न ततर्प समायान्तं पश्यमानो नराधिपः ॥ १३॥

अवतार्य सुमन्त्रस्तं राघवं स्यन्दनोत्तमात् ।
पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ॥ १४॥

स तं कैलासशृङ्गाभं प्रासादं नरपुङ्गवः ।
आरुरोह नृपं द्रष्टुं सह सूतेन राघवः ॥ १५॥

स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ।
नाम स्वं श्रावयन्नामो ववन्दे चरणौ पितुः ॥ १६॥

तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ।
गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम् ॥ १७॥

तस्मै चाभ्युद्यतं श्रीमान्मणिकाञ्चनभूषितम् ।
दिदेश राजा रुचिरं रामाय परमासनम् ॥ १८॥

तदासनवरं प्राप्य व्यदीपयत राघवः ।
स्वयेव प्रभया मेरुमुदये विमलो रविः ॥ १९॥

तेन विभ्राजिता तत्र सा सभाभिव्यरोचत ।
विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ॥ २०॥

तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ।
अलङ्कृतमिवात्मानमादर्शतलसंस्थितम् ॥ २१॥

स तं सस्मितमाभाष्य पुत्रं पुत्रवतां वरः ।
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥ २२॥

ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।
उत्पन्नस्त्वं गुणश्रेष्ठो मम रामात्मजः प्रियः ॥ २३॥

त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः ।
तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥ २४॥

कामतस्त्वं प्रकृत्यैव विनीतो गुणवानसि ।
गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितम् ॥ २५॥

भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ।

कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च ॥ २६ ॥

परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ।
अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरञ्जय ॥ २७ ॥

तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ।
तस्य नन्दन्ति मित्राणि लब्ध्वामृतमिवामराः ।
तस्मात्पुत्र त्वमात्मानं नियम्यैव समाचर ॥ २८ ॥

तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ।
त्वरिताः शीघ्रमभ्येत्य कौसल्यायै न्यवेदयन् ॥ २९ ॥

सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ।
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥ ३० ॥

अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥ ३१ ॥

ते चापि पौरा नृपतेर्वचस्तच्
छ्रुत्वा तदा लाभमिवेष्टमाप्य ।
नरेन्द्रमामन्त्य गृहाणि गत्वा
देवान्समानर्चुरतीव हृष्टाः ॥ ३२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com